श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश्वर अष्टोत्तरशतनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवेङ्कटेश्वर अष्टोत्तरशतनामस्तोत्रम् ॥

श्रियःकान्ताय कल्याण निधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गळम् ॥

श्री वेङ्कटाचलाधीशं श्रियाऽध्यासित वक्षसम्।
श्रितचेतनमन्दारं श्रीनिवासमहं भजे ॥

मुनय ऊचुः
सूत सर्वार्थ तत्त्वज्ञ सर्ववेदान्तपारग।
येन चाराधितस्सद्यः श्रीमद्वेङ्कटनायकः ॥ 1 ॥

भवत्यभीष्टसर्वार्थ प्रदस्तद्ब्रूहि नो मुने।
इति पृष्टस्तदा सूतो ध्यात्वा स्वात्मनि तत्क्षणात् ॥ 2 ॥

श्रीसूत उवाच
उवाच मुनिशार्दूलान् श्रूयतामिति वै मुनिः।
अस्ति किञ्चिन्महद्गोप्यं भगवत्प्रीतिकारकम् ॥ 3 ॥

पुरा शेषेण कथितं कपिलाय महात्मने।
नाम्नामष्टशतं पुण्यं पवित्रं पापनाशनम् ॥ 4 ॥

आदाय हेमपद्मानि स्वर्णदी सम्भवानि च।
ब्रह्मा तु पूर्वमभ्यर्च्य श्रीमद्वेङ्कटनायकम् ॥ 5 ॥

अष्टोत्तरशतैर्दिव्यैर्नामभिर्मुनि पूजितैः।
स्वाभीष्टं लब्धवान् ब्रह्मा सर्वलोकपितामहः ॥ 6 ॥

भवद्भिरपि पद्मैश्च समर्च्यस्तैश्च नामभिः।
तेषां शेषनगाधीश मानसोल्लास कारिणाम्॥ 7॥

नाम्नामष्टशतं वक्ष्ये वेङ्कटाद्रिनिवासिनः।
आयुरारोग्यदं पुंसां धनधान्यसुखप्रदम्॥ 8॥

ज्ञानप्रदं विशेषेण महदैश्वर्यकारकम्।
अर्चयेन्नामभिर्दिव्यैर्वेङ्कटेशपदाङ्कितैः॥ 9॥

नाम्नामष्टशतस्यास्य ऋषिर्ब्रह्मा प्रकीर्तितः।
छन्दोऽनुष्टुप्तथा देवो वेङ्कटेश उदाहृतः॥ 10॥

नीलगोक्षीरसम्भूतो बीजमित्युच्यते बुधैः।
श्रीनिवासस्तथा शक्तिर्हृदयं वेङ्कटाधिपः॥ 11॥

विनियोगस्तथाभीष्टसिद्ध्यर्थे च निगद्यते।
ओं नमो वेङ्कटेशाय शेषाद्रिनिलयाय च॥ 12॥

वृषदृग्गोचरायाथ विष्णवे सततं नमः।
सदञ्जनगिरीशाय वृषाद्रिपतये नमः॥ 13॥

मेरुपुत्रगिरीशाय सरस्स्वामितटीजुषे।
कुमाराकल्पसेव्याय वज्रिदृग्विषयाय च॥ 14॥

सुवर्चलासुतन्यस्त सैनापत्यभराय च।
रामाय पद्मनाभाय सदा वायुस्तुताय च॥ 15॥

त्यक्तवैकुण्ठलोकाय गिरिकुञ्जविहारिणे।
हरिचन्दनगोत्रेन्द्रस्वामिने सततं नमः॥ 16॥

शङ्खराजन्यनेत्राब्जविषयाय नमो नमः।
वसूपरिचरत्रात्रे कृष्णाय सततं नमः॥ **17** ॥

अब्धिकन्यापरिष्वक्तवक्षसे वेङ्कटाय च।
सनकादिमहायोगिपूजिताय नमो नमः॥ **18** ॥

देवजित्प्रमुखानन्तदैत्यसङ्घप्रणाशिने।
श्वेतद्वीपवसन्मुक्तपूजिताङ्घ्रियुगाय च॥ **19** ॥

शेषपर्वतरूपत्वप्रकाशनपराय च।
सानुस्थापितताक्ष्र्याय ताक्ष्र्याचलनिवासिने॥ **20** ॥

मायागूढविमानाय गरुडस्कन्धवासिने।
अनन्तशिरसे नित्यमनन्ताक्षाय ते नमः॥ **21** ॥

अनन्तचरणायाथ श्रीशैलनिलयाय च।
दामोदराय ते नित्यं नीलमेघनिभाय च॥ **22** ॥

ब्रह्मादिदेवदुर्दर्शविश्वरूपाय ते नमः।
वैकुण्ठागतसद्धेमविमानान्तर्गताय च॥ **23** ॥

अगस्त्याभ्यर्चिताशेषजनदृग्गोचराय च।
वासुदेवाय हरये तीर्थपञ्चकवासिने॥ **24** ॥

वामदेवप्रियायाथ जनकेष्टप्रदाय च।
मार्कण्डेयमहातीर्थजातपुण्यप्रदाय च॥ **25** ॥

वाक्पतिब्रह्मदात्रे च चन्द्रलावण्यदायिने।
नारायणनगेशाय ब्रह्मकॢप्तोत्सवाय च॥ **26** ॥

शङ्खचक्रवरानम्रलसत्करतलाय च।
द्रवन्मृगमदासक्तविग्रहाय नमो नमः॥ **27** ॥

केशवाय नमो नित्यं नित्ययौवनमूर्तये।
अर्थितार्थप्रदात्रे च विश्वतीर्थाघहारिणे॥ **28**॥

तीर्थस्वामिसरस्स्नातजनाभीष्टप्रदायिने।
कुमारधारिकावासस्कन्धाभीष्टप्रदाय च॥ **29**॥

जानुदघ्नसमुद्भूतपोत्रिणे कूर्ममूर्तये।
किन्नरद्वन्द्वशापान्तप्रदात्रे विभवे नमः॥ **30**॥

वैखानसमुनिश्रेष्ठ पूजिताय नमो नमः।
सिंहाचलनिवासाय श्रीमन्नारायणाय च॥ **31**॥

सद्भक्तनीलकण्ठार्च्यनृसिंहाय नमो नमः।
कुमुदाक्षगण श्रेष्ठ सैनापत्यप्रदाय च॥ **32**॥

दुर्मेधःप्राणहर्त्रे च श्रीधराय नमो नमः।
क्षत्रियान्तकरामाय मत्स्यरूपाय ते नमः॥ **33**॥

पाण्डवारिप्रहर्त्रे च श्रीकराय नमो नमः।
उपत्यकाप्रदेशस्थ शङ्करध्यातमूर्तये॥ **34**॥

रुक्माब्जसरसीकूललक्ष्मीकृततपस्विने।
लसल्लक्ष्मीकराम्भोजदत्तकल्हारकस्रजे॥ **35**॥

शालग्रामनिवासाय शुकदृग्गोचराय च।
नारायणार्थिताशेषजनदृग्विषयाय च॥ **36**॥

मृगयारसिकायाथ वृषभासुरहारिणे।
अञ्जनागोत्रपतये वृषभाचलवासिने॥ **37**॥

अञ्जनासुतदात्रे च माधवीयाघहारिणे।
प्रियङ्गुप्रियभक्षाय श्वेतकोलवराय च॥ **38**॥

नीलधेनुपयोधारासेकदेहोद्भवाय च।
शङ्करप्रियमित्राय चोळपुत्रप्रियाय च॥ **39** ॥

सुधर्मिणीसुचैतन्यप्रदात्रे मधुघातिने।
कृष्णाख्यविप्रवेदान्तदेशिकत्वप्रदाय च॥ **40** ॥

वराहाचलनाथाय बलभद्राय ते नमः।
त्रिविक्रमाय महते हृषीकेशाय ते नमः॥ **41** ॥

अच्युताय नमो नित्यं नीलाद्रिनिलयाय च।
नमः क्षीराब्धिनाथाय वैकुण्ठाचलवासिने॥ **42** ॥

मुकुन्दाय नमो नित्यमनन्ताय नमो नमः।
विरिञ्चाभ्यर्थितानीत सौम्यरूपाय ते नमः॥ **43** ॥

सुवर्णमुखरीस्नात मनुजाभीष्टदायिने।
हलायुधजगत्तीर्थ समस्तफलदायिने॥ **44** ॥

गोविन्दाय नमो नित्यं श्रीनिवासाय ते नमः।
अष्टोत्तरशतं नाम्नां चतुर्थ्या नमसान्वितम्॥ **45** ॥

यः पठेच्छृणुयान्नित्यं श्रद्धाभक्तिसमन्वितः।
तस्य श्रीवेङ्कटेशस्तु प्रसन्नो भवति ध्रुवम्॥ **46** ॥

अर्चनायां विशेषेण ग्राह्यमष्टोत्तरं शतम्।
वेङ्कटेशाभिधेयैर्यो वेङ्कटाद्रिनिवासिनम्॥ **47** ॥

अर्चयेन्नामभिस्तस्य फलं मुक्तिर्न संशयः।
गोपनीयमिदं स्तोत्रं सर्वेषां न प्रकाशयेत्॥ **48** ॥

श्रद्धाभक्तियुजामेव दापयेन्नामसङ्ग्रहम्।
इति शेषेण कथितं कपिलाय महात्मने॥ **49** ॥

कपिलाख्यमहायोगिसकाशात्तु मया श्रुतम्।
तदुक्तं भवतामद्य सद्यः प्रीतिकरं हरेः॥ **50**॥

॥ इति श्रीवेङ्कटेश्वर अष्टोत्तरशतनामस्तोत्रं समाप्तम्॥